योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १५७

सप्तपञ्चाशदधिकशततमो सर्गः । १५७

अथ सिन्धुर्वदिष्यति ।
आर्यानार्यवपुः कोऽहमभवं विमतिः पुरा ।
यद्वशान्मे कुसंस्कारः प्राक्तनोऽस्ति भवप्रदः ।। १
मन्त्री वदिष्यति ।
रहस्यं शृणु भो राजन्सावधानपरः क्षणम् ।
चोदितः संदधासीदमद्य मान्द्यविनाशनम् ।। २
किमप्याद्यन्तरहितमस्तीह सदनामयम् ।
स्थितं त्वमहमित्यादिरूपेण ब्रह्मशब्दितम् ।। ३
तद्ब्रह्म स्वयमेवाहं चिच्चेतामीति संविदम् ।
जीवतामिव गत्वास्ते चित्तीभूयात्यजद्वपुः ।। ४
चित्तं तु गगनाच्छात्म वपुर्विद्ध्यातिवाहिकम् ।
तदेव वास्ति नेहान्यदाधिभौतिकतादिकम् ।। ५
चित्तमेतदनाकारमपि साकारवत्स्थितम् ।
संकल्पैः परलोकाद्यैः स्वप्नाद्यैरेतदेव सत् ।। ६
अनाकारमपि स्फारं चित्तं जगदिदं विदुः ।
य एव पवनो नाम स एव स्पन्द्नं यथा ।। ७
यथा गगनशून्यत्वे जगच्चित्ते तथेककम् ।
अत्राप्रतिघरूपेऽस्ति न मनागपि भिन्नता ।। ८
हृदयस्थं जगज्जालं न किंचित्किंचिदास्थितम् ।
जगद्विद्धि निराकारं चित्तमेव न वास्तवम् ।। ९
सत्त्वमेव वपुः पूर्वमुदितं ब्रह्मणः पदात् ।
अयमेव स संपन्नो योऽद्य तामसतामसः ।। 6.2.157.१०
सिन्धुर्वक्ष्यति ।

किमुच्यते महाभाग वद तामसतामसः ।
क्रियन्ते पूर्वमेवैताः केन संज्ञाः परे पदे ।। ११
मन्त्री वदिष्यति ।
जन्तोः सावयवस्येह हस्ताद्यवयवा यथा ।
तथा नवयवस्यैवमातिवाहिकतात्मनः ।। १२
पश्चादात्मनि सैवात्मा नानासंज्ञाः करिष्यति ।
आधिभौतिकतानाम्नि पृथ्व्याद्या आतिवाहिके ।। १३
स्वप्नाभेऽस्मिञ्जगद्भाने संकल्पेनात्मरूपिणा ।
संज्ञात्मनात्मरूपेण स्वयं व्यवहरिष्यति ।। १४
त्वामातिवाहिकाकारा यत्तत्स्फुरितवान्नवम् ।
जातिर्महातमस्कोऽयमिति तत्राभिधा कृता ।। १५
ब्रह्मणो निर्विकारस्य विकारिण इव प्रभो ।
जातयो जीवतापत्तौ कलिता विविधाभिधाः ।। १६
प्राथम्येनैव यद्ब्रह्म जीवतामिव गच्छति ।
तदैव बुद्ध्या भोक्ता तज्जातिः सात्त्विकसात्त्विकी।।१७
वर्तमाने भवे भव्यगुणैर्युक्ता तु मानद ।
केवला सात्त्विकी प्रोक्ता जातिर्जातिविदां वरैः ।। १८
नवा भवैश्चेद्बहुभिर्भोगमोक्षैकभागिनी ।
जातिस्तत्प्रोच्यते तज्ज्ञैः सद्भी राजसराजसी ।। १९
वर्तमाने भवे भव्यगुणैर्मुक्ता तु मानद ।
केवला राजसी प्रोक्ता जातिः स्वल्पभवे भवेत् ।। 6.2.157.२०
प्रथमात्यन्तबहुभिर्भवैश्चेऽन्मोक्षगामिनी ।
जातिस्तत्प्रोच्यते तज्ज्ञैः सद्भिस्तामसतामसी ।। २१
सामान्येनैव बहुभिर्जन्मभिर्मोक्षभागिनी ।
केवला तामसी प्रोक्ता जातिर्जातिविशारदैः ।। २२
क्रमेणानेन जातीनां विविधा भेदकल्पना ।
तासां तामसतामस्यां जातौ जातोऽसि मानद ।। २३
बहूनि तव जन्मानि समतीतानि तान्यहम् ।
विविधानि विचित्राणि वीर जानामि नो भवान् ।।२४
विशेषेण त्वनेनैव व्यर्थं कालोऽतिवाहितः ।

महाशवशरीरेण त्वयानन्तखगामिना ।। २५

एवं तामसतामस्या जात्यासि जनितो यदा ।

तदा दुर्लभमोक्षस्त्वं संसारकुहरादिति ।। २६

सिन्धुर्वदिष्यति ।

आर्योदाहर केनैषा प्राग्जातिर्जीयतेऽधमा ।

यावत्तथैव तिष्ठामि स्याच्चेत्तद्वद पावनम् ।। २७

मन्त्री वदिष्यति ।

न किंचन महाबुद्धे तदस्तीह जगत्त्रये ।

यदनुद्वेगिना नाम पौरुषेण न लभ्यते ।। २८

ह्यस्तनी दुष्क्रियाभ्येति शोभां सत्क्रियया यथा ।

अद्यैव प्राक्तनीं तस्माद्यत्नात्सत्कार्यवान्भव ।। २९

यो यमर्थं प्रार्थयते तदर्थं यतते तथा ।

सोऽवश्यं तदवाप्नोति न चेच्छ्रान्तो निवर्तते ।। 6.2.157.३०

ना यथा यतते नित्यं यद्भावयति यन्मयः ।

यादृगिच्छेच्च भवितुं तादृग्भवति नान्यथा ।। ३१

मुनिरुवाच ।

एवमुक्तः स तेनाथ सिन्धुरुद्धुरया धिया ।

तदा तत्र तथा नाम राष्ट्रं त्यक्ष्यत्यशेषतः ।। ३२

गमिष्यति वनं दूरं प्रार्थितोऽपि हि मन्त्रिभिः ।।

नाश्रयिष्यति तद्भूयो राज्यमुच्छिन्नशात्रवम् ।। ३३ ।।

तिष्ठतः साधुमध्येऽस्य तद्विवेककथावशात् ।

पुष्पासङ्गादिवामोदो विवेकः समुदेष्यति ।। ३४

ततः कथमिदं जन्म कुतः संसार आगतः ।

इत्थं विचारसांतत्यात्स यास्यति विमुक्तताम् ।। ३५

नित्यं विचारणपरोऽथ भवन्स सिन्धुः

सत्सङ्गमेन पदमाप्स्यति पावनं सः ।

तद्यत्र पत्रमिव वातविधूयमानं

नो वस्तुतां व्रजति काचन नाम लक्ष्मीः ।।३६

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० नि० उ० अ० वि० शवोपाख्याने सिन्धुनिर्वाणं नाम

सप्तपञ्चाशदधिकशततमः सर्गः ।।१५७।।